# shrIKrishna Upanishad

# શ્રીકૃષ્ણોપનિષત્

## Document Information

Text title : kRiShNopaniShat

File name : krishnopan.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : H.P. Raghunandan hpraghu at genius.tisl.soft.net

Proofread by : H.P. Raghunandan, Shrisha Rao, Vijay S. Pai vijaypai, Gaura Nitai Dasa

Description-comments : Atharvavediya, Added saNkarShaNopaniShat from aprakAshita/unpublished upaniShads.

Latest update : April 23, 1996, May 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણોપનિષત્

॥ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

યો રામઃ કૃષ્ણતામેત્ય સાર્વાત્મ્યં પ્રાપ્ય લીલયા ।
અતોષયદ્દેવમૌનિપટલં તં નતોઽસ્મ્યહમ્ ॥ ૧॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

॥ અથ પ્રથમ ખંડઃ ॥

હરિઃ ૐ । શ્રીમહાવિષ્ણું સચ્ચિદાનન્દલક્ષણં રામચન્દ્રં
દૃષ્ટ્વા સર્વાઙ્ગસુન્દરં મુનયો વનવાસિનો વિસ્મિતા બભૂવુઃ ।
તં હોચુર્નોઽવદ્યમવતારાન્વૈ ગણ્યન્તે આલિઙ્ગામો ભવન્તમિતિ ।
ભવાન્તરે કૃષ્ણાવતારે યૂયં ગોપિકા ભૂત્વા મામાલિઙ્ગથ
અન્યે યેઽવતારાસ્તે હિ ગોપા ન સ્ત્રીશ્ચ નો કુરુ । અન્યોન્યવિગ્રહં
ધાર્યં તવાઙ્ગસ્પર્શનાદિહ । શાશ્વતસ્પર્શયિતાસ્માકં
ગૃણ્હીમોઽવતારાન્વયમ્ ॥ ૧॥

રુદ્રાદીનાં વચઃ શ્રુત્વા પ્રોવાચ ભગવાન્સ્વયમ્ ।
અઙ્ગસઙ્ગં કરિષ્યામિ ભવદ્વાક્યં કરોમ્યહમ્ ॥ ૨॥

મોદિતાસ્તે સુરા સર્વે કૃતકૃત્યાધુના વયમ્ ।
યો નન્દઃ પરમાનન્દો યશોદા મુક્તિગેહિની ॥ ૩॥ (મૌક્તિગેહિની)

માયા સા ત્રિવિધા પ્રોક્તા સત્ત્વરાજસતામસી ।
પ્રોક્તા ચ સાત્ત્વિકી રુદ્રે ભક્તે બ્રહ્મણિ રાજસી ॥ ૪॥

તામસી દૈત્યપક્ષેષુ માયા ત્રેધા હ્યુદાહૃતા ।
અજેયા વૈષ્ણવી માયા જપ્યેન ચ સુતા પુરા ॥ ૫॥ (અજેયા)

દેવકી બ્રહ્મપુત્રા સા યા વેદૈરુપગીયતે ।
નિગમો વસુદેવો યો વેદાર્થઃ કૃષ્ણરામયોઃ ॥ ૬॥

સ્તુવતે સતતં યસ્તુ સોઽવતીર્ણો મહીતલે ।
વને વૃન્દાવને ક્રીડઙ્ગોપગોપીસુરૈઃ સહ ॥ ૭॥

ગોપ્યો ગાવ ઋચસ્તસ્ય યષ્ટિકા કમલાસનઃ ।
વંશસ્તુ ભગવાન્ રુદ્રઃ શ ૃઙ્ગમિન્દ્રઃ સગોસુરઃ ॥ ૮॥

ગોકુલં વનવૈકુણ્ઠં તાપસાસ્તત્ર તે દ્રુમાઃ ।
લોભક્રોધાદયો દૈત્યાઃ કલિકાલસ્તિરસ્કૃતઃ ॥ ૯॥

ગોપરૂપો હરિઃ સાક્ષાન્માયાવિગ્રહધારણઃ ।
દુર્બોધં કુહકં તસ્ય માયયા મોહિતં જગત્ ॥ ૧૦॥

દુર્જયા સા સુરૈઃ સર્વૈર્ધૃષ્ટિરૂપો ભવેદ્દ્વિજઃ ।
રુદ્રો યેન કૃતો વંશસ્તસ્ય માયા જગત્કથમ્ ॥ ૧૧॥

બલં જ્ઞાનં સુરાણાં વૈ તેષાં જ્ઞાનં હૃતં ક્ષણાત્ ।
શેષનાગો ભવેદ્રામઃ કૃષ્ણો બ્રહ્મૈવ શાશ્વતમ્ ॥ ૧૨॥

અષ્ટાવષ્ટસહસ્રે દ્વે શતાધિક્યઃ સ્ત્રિયસ્તથા ।
ઋચોપનિષદસ્તા વૈ બ્રહ્મરૂપા ઋચઃ સ્ત્રિયાઃ ॥ ૧૩॥

દ્વેષશ્ચાણૂરમલ્લોઽયં મત્સરો મુષ્ટિકો જયઃ ।
દર્પઃ કુવલયાપીડો ગર્વો રક્ષઃ ખગો બકઃ ॥ ૧૪॥

દયા સા રોહિણી માતા સત્યભામા ધરેતિ વૈ ।
અઘાસુરો મહાવ્યાધિઃ કલિઃ કંસઃ સ ભૂપતિઃ ॥ ૧૫॥

શમો મિત્રઃ સુદામા ચ સત્યાક્રૂરોદ્ધવો દમઃ ।
યઃ શઙ્ખઃ સ સ્વયં વિષ્ણુર્લક્ષ્મીરૂપો વ્યવસ્થિતઃ ॥ ૧૬॥

દુગ્ધસિન્ધૌ સમુત્પન્નો મેઘઘોષસ્તુ સંસ્મૃતઃ ।
દુગ્ધોદધિઃ કૃતસ્તેન ભગ્નભાણ્ડો દધિગૃહે ॥ ૧૭॥

ક્રીડતે બાલકો ભૂત્વા પૂર્વવત્સુમહોદધૌ ।
સંહારાર્થં ચ શત્રૂણાં રક્ષણાય ચ સંસ્થિતઃ ॥ ૧૮॥

કૃપાર્થે સર્વભૂતાનાં ગોપ્તારં ધર્મમાત્મજમ્ ।
યત્સ્રષ્ટુમીશ્વરેણાસીત્તચ્ચક્રં બ્રહ્મરૂપધૃક્ ॥ ૧૯॥

જયન્તીસંભવો વાયુશ્ચમરો ધર્મસંજ્ઞિતઃ ।
યસ્યાસૌ જ્વલનાભાસઃ ખડ્ગરૂપો મહેશ્વરઃ ॥ ૨૦॥

કશ્યપોલૂખલઃ ખ્યાતો રજ્જુર્માતાઽદિતિસ્તથા ।
ચક્રં શઙ્ખં ચ સંસિદ્ધિં બિન્દું ચ સર્વમૂર્ધનિ ॥ ૨૧॥

યાવન્તિ દેવરૂપાણિ વદન્તિ વિભુધા જનાઃ ।
નમન્તિ દેવરૂપેભ્ય એવમાદિ ન સંશયઃ ॥ ૨૨॥

ગદા ચ કાળિકા સાક્ષાત્સર્વશત્રુનિબર્હિણી ।
ધનુઃ શાર્ઙ્ગં સ્વમાયા ચ શરત્કાલઃ સુભોજનઃ ॥ ૨૩॥

અબ્જકાણ્ડં જગત્બીજં ધૃતં પાણૌ સ્વલીલયા ।
ગરુડો વટભાણ્ડીરઃ સુદામા નારદો મુનિઃ ॥ ૨૪॥

વૃન્દા ભક્તિઃ ક્રિયા બુદ્ધિઃ સર્વજન્તુપ્રકાશિની ।
તસ્માન્ન ભિન્નં નાભિન્નમાભિર્ભિન્નો ન વૈ વિભુઃ ।
ભૂમાવુત્તારિતં સર્વં વૈકુણ્ઠં સ્વર્ગવાસિનામ્ ॥ ૨૫॥

સર્વતીર્થફલં લભતે ય એવં વેદ । દેહબન્ધાદ્વિમુચ્યતે ઇત્યુપનિષત્ ।
ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
॥ ઇતિ ૐ તત્સત્ ॥

Conventionally, the Krishnopanishad ends here.
The second part which is a sankarShaNopaniShat સઙ્કર્ષણોપનિષત્
is added as per Ramanuja and Gaudiya sampradAya.

॥ ઇતિ પ્રથમ ખણ્ડઃ ॥

॥ અથ દ્વિતીયઃ ખણ્ડઃ ॥

(સઙ્કર્ષણોપનિષત્)

શેષો હ વૈ વાસુદેવાત્ સંકર્ષણો નામ જીવ આસીત્ ।

સોऽકામયત પ્રજાઃ સૃજેયેતિ ।

તતઃ પ્રદ્યુમ્નસંજ્ઞક આસીત્ ।

તસ્માત્ અહંકારનામાનિરુદ્ધો હિરણ્યગર્ભોऽજાયત ।

તસ્માત્ દશ પ્રજાપતયો મરીચ્યાદ્યાઃ
સ્થાણુદક્ષકર્દમપ્રિયવ્રતોત્તાનપાદાદયોऽપ્યજાયન્ત । (પ્રિયવ્રતોત્તાનપાદવાયવો વ્યજાયન્ત)

તેભ્યઃ સર્વાણિ ભૂતાનિ ચ ।

તસ્માચ્છેષાદેવ સર્વાણિ (ચ ભૂતાનિ) સમુત્પદ્યન્તે ।

તસ્મિન્નેવ પ્રલીયન્તે ।

સ એવ બહુધા જાયમાનઃ સર્વાન્ પરિપાતિ ।

સ એવ કાદ્રવેયો વ્યાકરણજ્યોતિષાદિશાસ્ત્રાણિ નિર્મિમાણો
બહુભિર્મુમુક્ષુભિરુપાસ્યમાનોऽખિલાં ભુવમેકસ્મિન્
શીર્ષ્ણિ સિદ્ધાર્થવદવધ્રિયમાણઃ સર્વૈર્મુનિભિઃ
સમ્પ્રાર્થ્યમાનઃ સહસ્રશિખરાણિ મેરોઃ
શિરોભિરાવાર્યમાણો મહાવાય્વહંકારં નિરાચકાર ।

સ એવ ભગવાન્ ભગવન્તં બહુધા વિપ્રીયમાણઃ અખિલેન સ્વેન
રૂપેણ યુગે યુગે તેનૈવ જયમાનઃ સ એવ સૌમિત્રિરૈક્ષ્વાકઃ
સર્વાણિ ધાનુષશસ્ત્રાણિ સર્વાણ્યસ્ત્રશસ્ત્રાણિ બહુધા
વિપ્રીયમાનો રક્ષાંસિ સર્વાણિ વિનિઘ્નંશ્ચાતુર્વર્ણ્યધર્માન્
પ્રવર્તયામાસ ।

સ એવ ભગવાન્ યુગસંધિકાલે શારદાભ્રસંનિકાશો
રૌહિણેયો વાસુદેવઃ સર્વાણિ ગદાદ્યાયુધશસ્ત્રાણિ
વ્યાચક્ષાણો નૈકાન્ રાજન્યમણ્ડલાન્નિરાચિકીર્ષુઃ
ભૂભારમખિલં નિચખાન ।

સ એવ ભગવાન્ યુગે તુરીયેऽપિ બ્રહ્મકુલે (બ્રહ્મણ્યાં) જાયમાનઃ સર્વ
ઉપનિષદ ઉદ્દિધીર્ષુઃ સર્વાણિ ધર્મશાસ્ત્રાણિ
વિસ્તારયિષ્ણુઃ સર્વાનપિ જનાન્ સંતારયિષ્ણુઃ
સર્વાનપિ વૈષ્ણવાન્ ધર્માન્ વિજૃમ્ભયન્

સર્વાનપિ પાષણ્ડાન્નિચખાન ।

સ એષ જગદન્તર્યામી ।

સ એષ સર્વાત્મકઃ ।

સ એષ મુમુક્ષુભિર્ધ્યેયઃ ।

સ એષ મોક્ષપ્રદઃ ।

એતત્સ્મૃત્યા સર્વેભ્યઃ પાપેભ્યો મુચ્યતે ।

તન્નામ સંકીર્તયન્ વિષ્ણુસાયુજ્યં ગચ્છતિ ।

તદેતદ્દિવાઽધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।

નક્તમધીયાનો દિવસકૃતં પાપં નાશયતિ ।

તદેતદ્વેદાનાં રહસ્યમ્ । તદેતદુપનિષદાં રહસ્યમ્ ।
એતદધીયાનઃ સર્વક્રતુફલં લભતે ।
શાન્તિમેતિ । મનઃશુદ્ધિમેતિ । સર્વતીર્થફલં લભતે ।
ય એવં વેદ । દેહબન્ધાદ્વિમુચ્યતે । ઇત્યેવોપનિષત્ ॥

॥ ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ (ઇતિ સઙ્કર્ષણોપનિષત્ સમાપ્તા ॥)
હરિઃ ૐ તત્સત્ ।

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

॥ ઇતિ કૃષ્ણોપનિષત્સમાપ્તા ॥

॥ ભારતીરમણમુખ્યપ્રાણંતર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

The second khaNDa/chapter, the Sankarshanopanishat, is found in
Aprakashita/Unpublished Upanishad list.
It differs slightly as posted here perhaps modifications
as per the influence of sampradAyAs.

Encoded by H.P. Raghunandan

Profread by H.P. Raghunandan, Shrisha Rao, Vijay S. Pai, Gaura Nitai Dasa

*shrIKrishna Upanishad*

pdf was typeset on May 14, 2022

Please send corrections to *sanskrit@cheerful.com*